# Shri Saketanivasacharyavirachita Prapattikusumanjalih

# શ્રીસાકેતનિવાસાચાર્યવિરચિતા પ્રપત્તિકુસુમાઞ્જલિઃ

## Document Information

Text title : Shri Saketanivasacharyavirachita Prapattikusumanlih

File name : prapattikusumAnjaliHsAketanivAsAchArya.itx

Category : raama, rAmAnanda, prapatti

Location : doc_raama

Author : sAketanivAsAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીસાકેતનિવાસાચાર્યવિરચિતા પ્રપત્તિકુસુમાઞ્જલિઃ

(શ્રીટીલાચાર્ય)

રઘુપતેઽહમકિઞ્ચનતાં ગતસ્તવ સુરક્ષકતામતિવિશ્વસન્ ।
નિજભરં નિદધામ્યખિલાત્મનિ ત્વયિ પરેશ વિભો ગુણસાગરે ॥ ૧॥

અનનુકૂલકુભાવવિવર્જિતસ્ત્વદનુકૂલસુભાવગતસ્તથા ।
અહમનન્યતયા ક્ષિતિજાપતે! સુશરણં ચરણશ્ચ ગતોઽસ્મિતે ॥ ૨॥

મમ સુરક્ષણકર્મણિ યો ભરઃ ફલમહશ્ચ ન મે ભુવનમ્ભર ।
અપિ તુ ભક્તસમર્પિતહત્ પ્રભો! તવ તતશ્ચ નિજં હિ સમર્પયે ॥ ૩॥

નહિ મિલેદ્ દયનીયજનશ્ચ તે રઘુપતે મયિ ચેન્ન દયા તવ ।
સુદયનીયજનૈકનિધે તતઃ કુરુ દયાં મયિ નાથ દયામ્બુધે ॥ ૪॥

ત્વમસિ નો મદૃતે દયનીયવાનહમપિ ત્વદૃતેઽસ્મિ ન નાથવાન્ ।
વિધિવિનિર્મિતમેદવેક્ષ્ય તત્ કરુણયા કરુણાકર પાહિ મામ્ ॥ ૫॥

સુશરણં ચરણં ત્વપહાય તે કથમિયામહમન્યમકિઞ્ચનઃ ।
રઘુપતે! દૃઢમાયતપોતકં ત્યજતિ કિં જલધૌ લઘુવાયસઃ ॥ ૬॥

ઇહ તિરસ્કૃતતા ગમિતોઽપ્યહં રઘુપતે! ન જહામિ પદઞ્ચ તે ।
નિજજનન્યવધૂતશિશુર્યથા સ્વજનનીચરણં વિજહાતિ ન ॥ ૭॥

વરદ દાશરથે વરદાપતે કુરુ કૃપામિદમેવ ચ દેહિ મે ।
ત્વદરવિન્દબિલજ્જકપાદયોર્ભવતુ જન્મનિ જન્મનિ મે સ્મૃતિઃ ॥ ૮॥

વસુધયા વસુધાત્મજયા તથા રુચિરયા રુચિરં પરિસેવિત! ।
રઘુપતે! સુલભો જગતીપતે! ભવ ભવામ્બુનિધૌ પતિતસ્ય મે ॥ ૯॥

સમવભાતિ ન તે સમતાં ગતસ્ત્વદધિકોઽપિ હિ નાથ ન કશ્ચન ।
પ્રપદનં વિદધે પદયોશ્ચ તે નિખિલપાલક! પાલય મામપિ ॥ ૧૦॥

કૃતભવાભવ કારણકારણ પ્રકૃતિરક્ષક રક્ષ્યવિલક્ષણ ।

રઘુપતે પદયોઃ પતિતે ચ તે કુરુ કૃપાં કૃપણે મયિ પામરે ॥ ૧૧॥

તવ વિભોશ્ચરણં શરણં ગતો જન ઇહ ત્રિગુણૈઃ પરિભૂયતે ।
અભિહિતા રઘુનાયક ભારતે પ્રકૃતિતારક તારકતા ક્વ તે ॥ ૧૨॥

અધમતાવ્યથિતા પૃથિવી પુરા રઘુપતે ત્વયૈકા પરિમણ્ડિતા ।
પુનરિદં હિ તથા ક્ષિતિમણ્ડલં ભુવનમણ્ડલમણ્ડન મણ્ડય ॥ ૧૩॥

રઘુપતે ત્વયેકૈવ યુગે યુગે સમવતીર્ય હિ દક્ષકુરક્ષસામ્ ।
બલમખણ્ડ્યમખણ્ય! સુખણ્ડિતં વિજહિ મત્પ્રતિઘાદિકરાક્ષસાન્ ॥ ૧૪॥

અદયતાઞ્ચ ગતેઽભયતા કુતો ન ચ ભયં સદયે ત્વયિ રાઘવ ।
અભયતાર્થમતઃ શરણં વિભો ત્વદપરં પુરુષં ન વિભાવયે ॥ ૧૫॥

કૃતમતિર્જગતઃ પરિપાલને સુકૃપણસ્ય તદા મમ રક્ષણે ।
કૃતમતિપ્રભૃતેઃ સહકારણિશ્ચ વિફલં જગદીશ ગવેષણમ્ ॥ ૧૬॥

ઇતિ શ્રીસાકેતનિવાસાચાર્યવિરચિતા પ્રપત્તિકુસુમાઞ્જલિઃ સમાપ્તા ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Saketanivasacharyavirachita Prapattikusumanjalih*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*